श्रीमदाञ्जनेयसुप्रभातम्

{॥ श्रीमदाञ्जनेयसुप्रभातम् ॥}

श्रीसीतारामाभ्यां नमः । श्रीमदाञ्जनेयाय नमः ।

अमलकनकवर्णं प्रज्वलत्पावकाक्षं सरसिजनिभवक्त्रं सर्वदा सुप्रसन्नम्

रणरचनसुगात्रं कुण्डलालङ्कृताङ्गं परजयकरवालं रामदूतं नमामि ॥

श्रीरामचन्द्रचरणाम्बुजमत्तभृङ्ग श्रीराममन्त्रजपशील भवाब्धिपोत

।

श्रीजानकीहृदयतापनिवारमूर्ते श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ १॥

श्रीरामदिव्यचरितामृतास्वादलोल श्रीरामकिङ्कर गुणाकर दीनबन्धो ।

श्रीरामभक्त जगदेकमहोग्रशौर्य श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ २॥

सुग्रीवमित्र कपिशेखर पुण्यमूर्ते सुग्रीवराघवसमागमदिव्यकीर्ते ।

सुग्रीवमन्त्रिवर शूरकुलाग्रगण्य श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ ३॥

भक्तार्तिभञ्जन दयाकर योगिवन्द्य श्रीकेसरीप्रियतनूज सुवर्णदेह ।

श्रीभास्करात्मजमनोऽम्बुजचञ्चरीक श्रीवीर धीर हनुमन् तव सुप्रभातम्॥ ४॥

श्रीमारुतप्रियतनूज महाबलाढ्य मैनाकवन्दितपदाम्बुज दण्डितारिन् ।

श्री उष्ट्रवाहन सुलक्षणलक्षिताङ्ग श्रीवीर धीर हनुमन् तव सुप्रभातम्॥ ५॥

Stotram Digitalized By Sanskritdocuments.org

पञ्चाननस्य भवभीतिहरस्य रामपादाब्जसेवनपरस्य परात्परस्य ।
श्री अञ्जनाप्रियसुतस्य सुविग्रहस्य श्रीवीर धीर हनुमन् तव सुप्रभातम्॥ ६॥

गन्धर्वयक्षभुजगाधिपकिन्नराश्च आदित्यविश्ववसुरुद्रसुरर्षिसङ्घाः ।
सङ्कीर्तयन्ति तव दिव्यसुनामपङ्क्ति श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ ७॥

श्रीगौतमच्यवनतुम्बुरुनारदात्रिमैत्रेयव्याससजनकादिमहर्षिसङ्घाः ।
गायन्ति हर्षभरितास्तव दिव्यकीर्तिं श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ ८॥

भृङ्गावली च मकरन्दरसं पिबेद्यं कूजन्त्युदारमधुरं चरणायुधाश्च ।
देवालये घनगभीरसुशङ्खघोषः श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ ९॥

पम्पासरोवरसुपुण्यपवित्रतीर्थमादाय हेमकलशैश्च महर्षिसङ्घाः ।
तिष्ठन्ति त्वच्चरणपङ्कजसेवनार्थं श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ १०॥

श्रीसूर्यपुत्रप्रिय नाथ मनोज्ञमूर्ते वातात्मजात कपिवीर सुपिङ्गलाक्ष ।
सञ्जीवनाय रघुवीरसुभक्तवर्य श्रीवीर धीर हनुमन् तव सुप्रभातम् ॥ ११॥

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Anjaneya Suprabhatam Lyrics in Devanagari PDF
% File name : AnjaneyasuprabhAtam.itx
% Category : suprabhAta
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 18, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website